International Journal of Sanskrit Research 2021; 7(4): 238-242

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 238-242
© 2021 IJSR
www.anantaajournal.com
Received: 19-05-2021
Accepted: 24-06-2021

**Rohit Nagesh Karbhajan**
Assistant Professor, (Sanskrit),
Badruka College, Hyderabad,
Talangana, India

**Corresponding Author:**
**Rohit Nagesh Karbhajan**
Assistant Professor, Sanskri,
Badruka College, Hyderabad,
Talangana, India

# व्यक्तित्वविकासाय संस्कृताध्ययनस्यावश्यकता।

**Rohit Nagesh Karbhajan**

## प्रस्तावना

मानवजीवने आचार -विचार-व्यवहारार्थं अत्युपयुक्तं साधनं नाम व्यक्तित्वविकासः। मनुजस्य चरित्रं अथवा आचरणं कथमस्ति इति ज्ञातव्यं चेत्, तदा तस्य व्यक्तित्वमेव दृष्टव्यं। तस्य वर्तनं, वार्तालापं, मृदुत्वं, भ्रमणं, व्यवहारम्, ज्येष्ठान्प्रति वर्तनं, कनिष्ठान्प्रति वर्तनं, यदा क्रोधीभवेत् तदा कथं वर्तनं करोतीति परिपूर्णावलोकनं अस्मिन् समाजजीवने मनुजस्य भवति।एतेष्वेव तस्य व्यक्तित्वं कथं अस्ति इति निश्चितं भवति। ये मनुजा:यशस्विन:सन्ति तस्यकारणं तेषां व्यक्तित्वविकासः एव।
मनुजस्य जीवने व्यक्तित्वविकासाय तस्य किशोरावस्था (Teen age) एव अतिमहत्वपूर्णा। तस्मिन् समये एव मनुजः तस्य भविष्यकालजीवनं कथं भवेदिति निर्धारणं करोति। तदनुसृत्यैव अध्ययनं करोति अधुनिककालस्य प्रेरणया वैद्यः, अभियंता, वैज्ञानिकः इत्यादयः वृत्तिं स्वीकुर्वन् तेन धनसंचयः करोति । परं एतत्सर्वंकर्तुं यदि तस्य समीपे व्यक्तित्वं नास्ति, योग्य-अयोग्ययोः स्वीकरणक्षमता नास्ति चेत् सर्वं विफलं भवति। किशोराः कथं अयोग्यपथि सत्वरं गन्तुं प्रयतन्ते इति सर्वे जानन्ति यदा गच्छन्ति तदा तेषां तस्मात् मार्गात् पुनरागमनं न सुकरं भवति, समग्रं जीवनं व्यर्थं भवति तस्य कारणेन मातृपितृभ्याम् परिवारजनानां कथं कु-अवस्था भवति इति सर्वे जनाः प्रतिदिने वृत्तपत्रे अथवा दूरदर्शने वृत्तप्रसारसमये पश्यन्ति एव। अतः एतस्योपरि किमुपायं पृष्टे सति एकमेव उत्तरं दियते तन्नाम "संस्कारः" बालावस्थासु किशोरावस्थासु वा यदि मनुजानां उपरि संस्काराः भवन्ति तदा ते निश्चितमेव सत्पथमुगच्छन्ति। अपि च एतस्य प्राप्तेः साधनं संस्कृताध्ययनम्। भवान् पश्यन्तु कुत्रापि, ये संस्कृतानुरागिनः सन्ति ते कदापि कुमार्गस्यानुकरणं नैव कुर्वन्तीति। अतः किशोराणां अथवा बालानां हिताय संस्कृते किं अधीतव्यं?किं अनुसर्तव्यं? इत्यस्य कृते एव एतद् लेखनं।
अस्मिन् लेखे व्यक्तिक्त्व विकासाय संकृत ग्रंन्थाः के ? तद् आचरणेन किं भवेत् इत्यादयः विषयाः सन्ति।

**पंचतंत्रम्**

विश्वेस्मिन् षष्टिपरिमित भाषायाम् ग्रन्थस्यास्य अनुवाद: समुपलभ्यते एतावती महती जनप्रियता पंचतंत्रस्यास्ति। बालावस्थासु पंचतंत्रम् तु अवश्यं अधीतव्यमेव।

संस्कृतसाहित्ये व्यक्तित्व विकासाय प्रथम: ग्रन्थ: पंचतन्त्रमेव योग्यम् इति मे मति:। विद्वान् विष्णुशर्मा किमर्थं एतस्य रचनां अकरोत् तस्या एका कथा अस्ति।

प्राचीन समये एक: राजा बभूव तस्य त्रय: पुत्रा: आसन् परं ते पुत्रा व्यवहारकुशला: नासीत् इति राज्ञ: महती चिन्ता । अथैकदा स भूप: प्रोक्तवान् य: मम् पुत्रान् व्यवहारकुशलीकर्तुं प्रभवति तस्मै अहं बहुधनं दास्यामि। तदा एक: विष्णुशर्मा नाम विद्वान् पुरत: आगत्य तस्य आह्वानम् स्वीकृतवान्। स तान् राजपुत्रान् षण्मास पर्यन्तं स्वआश्रमे नीतवान् तथा तान् सम्यक् अवलोक्य तेभ्य: किं रोचते किं न रोचते इति ज्ञात्वा कथं ते पुत्रा: पठितुं प्रभवेत् एतस्याभ्यासं कृत्वा तान् पशुपक्षिण: कथा: श्रावयित्वा तस्य सारं पाठयित्वा षण्मासे एव तेभ्य: व्यवहारचतुरं कृतवानयं पण्डित:। तदेव ग्रन्थस्य नामधेयम् पंचतंत्रं। पंचतंत्रे सर्वा: कथा: अतीव बोधप्रदा: व्यवहार: कथं कर्तव्यं व्यवहारे कथं वर्तितव्यं कथं च न इति शिक्षयितुं समर्था:।

अत्र पंचतंत्रेस्मिन् अपरीक्षितकारकस्य श्लोका: अतीव बोधप्रदा: सर्वेषांकृते-

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितं ।
तन्नरेण न कर्तव्यं नापितेनात्र यत्कृतम॥

नर:समन्तादवलोक्यैव सर्वम् सम्यक् ज्ञात्वा एव कृति: करणीया यदि न करोति चेत् तस्य गति: पंचतन्त्रस्थ नापितसदृशी भवेत्।

अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत् ।
अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके॥

मानवै: अति लोभ: नैव कर्तव्य: तथा लोभ: सम्पूर्णतया न त्यक्तव्य:। यदि अतिलोभाभिभूत: भवेत् तर्हि पंचतंत्रस्था कथामनुसृत्य मस्तके चक्रं भ्रमति।

कार्यनाशे समुत्पन्ने अर्धंत्यजति पण्डित:।
अर्धेन कुरुते कार्यं सर्वनाशो हि दु:सह:॥

यदि सर्वनाश: आगत: नाम प्राणघातक परिस्थितीम् अवगम्य पण्डित: तस्य समीपे यद्किमपि अस्ति तद् त्यजति अनन्तरम् सर्वम् पुन:प्राप्नोति स्वप्राणं रक्षति, किन्तु जीवनं एव नास्ति तर्हि किमपि न भवेत्। तथा एव मनुजै: कर्तव्य:।

एतस्मात् श्लोकात् पंचतंत्रस्य महती कियती अस्ति इति ज्ञायते तथा नैका: पशुपक्षिण: सुबोधां कथां अस्मिन्नस्ति तेन निश्चितं व्यक्तित्व विकास: भविष्यति।

**नीतिशतकम्**

पण्डितभर्तृहरे: अतुलनात्मकम् कार्यम् अथवा कृति:नाम नीतिशतकम् ग्रन्थ: ग्रन्थेऽस्मिन् शतश्लोकानाम् संग्रहणं अत: शतकम् ते श्लोका: नीतिविषयका:सन्ति अत: तस्य नाम नीतिशतकम् इति सुविख्यातम् । व्यक्तित्वविकासाय इमे श्लोका: अतीवमहत्वपूर्णा: सुगमा: अपि विद्यन्ते। अत्र एकश्लोकस्य उपदेश: अवश्यंकर्तुं कामये

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने।
प्रीति: साधुजने नयोनृपजने विद्वज्जने चार्जवम्॥
शौर्यंशत्रुजने क्षमा गुरुजने नारीजने धृष्टता ।
ये चैवं पुरुषा: कलासु कुशला: तेष्वेवलोकस्थिति: ॥

मानव: यदा समाजजीवने समयं यापयति तदा तस्य जीवने नैके जना: आगच्छन्ति तै: सह सम्बन्ध: अपि दृढीभवति परं कै: सह कथं वर्तितव्यं इति अस्मिन् श्लोके प्रतिपादितं पण्डितेन भतृहरिणा। एतेसदृशा: नैके श्लोका: किशोरावस्थासु वा बालावस्थासु संस्कारान् आरोपयति तनैव व्यक्तित्व विकास: भविष्यति। भतृहरिणा एतस्मिन्ग्रन्थे लोभ-द्वेष-आलस्य-अनभ्यास एतेषांअवगुणानां निन्दा कृता तथा उद्यम-अभ्यास-

परोपकार-सत्कर्म-सद्गुण एतेषां गुणानां स: प्रशंसा च अकरोत्। व्यक्तित्व विकासाय अहंकार: कथं घातक: मानवाय इत्यपि विषये वर्णितवान् भतृहरिः।

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्ध: समभवम् ।
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन:॥
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं।
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगत:॥

सत्संगति: किमर्थं महत्वपूर्णा इति अनेन श्लोकेन ज्ञातुं शक्यते वयं। अत: नीतिशतकं व्यक्तित्व विकासाय महत्वपूर्णमेव।

**श्रीमद्भगवद्गीता**

अयम् महाग्रन्थ:तु विश्वहितायैव भगवता श्रीकृष्णेन अर्जुनाय कथित:, भगवता वेदव्यासेन च सम्पादित:। तथा अस्य ग्रन्थस्य ख्याति: तु तत्वज्ञानस्य महासागर: इत्यभिधाम्ना विराजते। ग्रन्थोऽयम् विश्वेऽस्मिन् शताधिकं भाषासु भाषांतरितो भूत्वा सर्वान् श्रीकृष्ण इव विश्वहिताय प्रेरयति। भगवान् श्रीकृष्ण: मानवेभ्य: स्वविकासाय इमम् उपहारं एव दत्तवान्।

**"उध्दरेदात्मनात्मानं"**

मानवै:स्वस्य विकास: स्वेनैव कर्तव्य:।

श्रीमद्भगवद्गीता इत्यस्मिन् ग्रन्थे श्रीकृष्ण: मानवजीवनेषु सम्बन्धितेषु सर्वासु अवस्थासु विवेचनं कृतवान्।तथा श्रीकृष्ण: मानवस्य परिपूर्ण हिताय ज्ञानयोग, भक्तियोग, कर्मयोग, सांख्ययोग तथा वैराग्य एतेषामुपरि स्ववाण्या महावीर अर्जुनमाध्यमेन उपदेशं दत्तवान्।यदि कोऽपि मानव: मनसा विचलितो भवेत् तर्हि भगवद्गीताभ्यासेन स्थिरोभूत्वा आन्देन निश्चितं कालं यापयेदेव।

मानवस्य जीवने सुखं स्यात् अथवा दु:खं तेन स्थिरचित्तत्वं एव अवलम्ब्य:।

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदु: खसुखं धीरं सोऽमृतत्वाय कल्पते।।2.15।।
सुखदु: खे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।।2.38।।
त्रिविधं नरकस्येदं द्वारं नाशनमात्मन:।
काम: क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।।16.21।।

इमे सदृशा: नैके श्लोका: तु मानवेभ्य: उत्तेजनं प्रदातुं समर्था: तथा व्यक्तित्व विकासाय प्रधानतर:। अत: भगवद्गीता कति महत्वपूर्णा मानवान् व्यक्तित्व विकासाय अस्य तुलना नैव कर्तुं शक्यते। सर्वान् मानवान् अस्य ग्रन्थस्याभ्यासेन स्वजीनम् कृतार्थं करणीयमेव।

**<u>सुभाषितरत्नभाण्डागारम्</u>**

सुभाषितरत्नभाण्डागारम् इत्यस्मिन् ग्रन्थे नैकविधा: श्लोका: सन्ति। यानि कानि च सकलाण्यपि वस्तुनि मानवजीवने समाश्रितानि तेषां विषये नैका: श्लोका: सुभाषितरत्नभाण्डागारम् ग्रन्थे विद्यन्ते।

कोऽपि पण्डित: वदति-

सुभाषित रसास्वाद:सज्जनै:सह सङ्गति:।
सेवा विवेकीभूपस्य दु:ख निर्मूलनं त्रयं॥

अथवा

पृथिव्यां त्रिणि रत्नानि जलमन्नं सुभाषितं।
मुढै: पाषाण खण्डेषु रत्न संज्ञा विधीयते॥

सुभाषितानां महत्वं तु उपर्युक्तम् सूक्तीनुसारमेव वर्तते।अस्मिन् जीवने सुभाषितानां अस्तित्वं तु व्यक्तित्व विकासाय एव।जलमन्नसुभाषितान् विहाय सर्वं न्यूनमेव।किशोरावस्थासु सुभाषितानां सग्रहणं अवश्यमेव करणीयं तेषां माध्यमेनैव मानवान् उत्साह: उर्जा च लभ्येते।

कोपि सुभाषितकार इत्थं वदति-

सुभाषितमयैर्द्रव्यैः संग्रहं न करोति यः।
सोऽपिप्रस्ताव यज्ञेषु कां प्रदास्यति दक्षिणां॥

केऽपि श्लोका: मानवस्य अपरिमितं शक्तिं प्रतिपादयति।
तेषामेक:-

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।
अयोग्य:पुरुषोनास्ति योजकस्तत्र दुर्लभ:॥

सर्वेषां वस्तूनां उपयोगित्वं इति विषये अयं श्लोक:,विश्वेऽस्मिन् केषामपि अनुपयोगित्वं नास्ति इति भाव:।अतएव सुभाषितरत्नभाण्डागारम् इति श्लोकस्य अध्ययनं महत्वपूर्णं ।

**<u>महाभारतम्।</u>**

"यदिहास्तितदन्यत्र यन्नेहास्तिनतत्क्वचित्"

इति गौरवोद्गारा: विद्वद्भि: उक्ता:।मानव जीवने ये के च विषया:मानवस्य व्यक्तित्व विकासाय सन्ति तेषां विषये विवेचनं अस्मिन् शतसाहस्त्रीसंहितायां नाम महाभारत ग्रन्थे विद्यते।
कस्मिन् अवस्थायां कथं वर्तितव्यं?कथं धर्माधर्म भेद:ज्ञातव्य:?केषां स्वीकरणं कर्तव्यं?पापपुण्ययोर्मार्ग:कथं अभिज्ञातव्य:?सत्सङ्ग: कथं लाभप्रद:?दान माहात्म्यं,विद्या माहात्म्यं,गुरूसेवा,मातृपितृ भक्ति:,अतिथिमहत्वं,राज्यव्यवहार:,राज्ञ: प्रजाविषये कर्तव्यानि,एतादृशान् नैकविधान् प्रश्नानां उत्तराणि अस्मिन् ग्रन्थे सन्ति।
इमे महाभारतीया: श्लोका: उपर्युक्तविषयाणां महत्वं प्रतिपादयन्ति।

अन्योन्यबाधनावस्थां प्राप्य वैषयिकीं नराः।
असन्तुष्टाः प्रमुह्यन्ति सन्तोषं यान्ति पण्डिताः ।।स्त्रीपर्व.2।31

अत्र सन्तोष महत्वं वर्णितम् यदि नर:सर्वदा एव असन्तुष्ट:भवेत् तर्हि तस्य जीवनं निष्फलं दुष्करम् च भवेत् ।सर्वत्र सन्तोष:तु मानवस्यायु: वर्धयति इति केचन् विद्वांस: गदन्ति।

येनयेन शरीरेण यद्यत्कर्म करोति यः।
तेनतेन शरीरेण तत्फलं समुपाश्नुते।।स्त्रीपर्व.2।35

अस्मिन् श्लोके कर्म विषयकं विवेचनं यद् यद् कर्म वयम् कुर्म:तस्य तद् तद् फलं निश्चितं प्राप्नुम: तद् सत्कर्म विद्यते चेत् सत्फलं लभेत् कुकर्म विद्यते कुफलमेव लभेत्

यस्यार्थास्तस्यमित्राणि यस्यार्थास्तस्य बान्धवा:।
यस्यार्था: स पुमाँलोके यस्यार्था: स च पण्डित: ॥शान्तिपर्व.8।19

अत्र तु वित्तस्य महत्वं वित्तं मानवजीवने कति महत्वपूर्णं तेन वयं समाजक्षेत्रे प्रतिष्ठां लब्धुं शक्यते सर्वे मित्राणि,बान्धवा:सर्वं कार्यं तेनैव भवति इति श्लोकस्य भाव:।

यादृशं वपते बीजं क्षेत्रमासाद्य वापक:।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ॥अनुशासनपर्व.9।8

यथा कर्म तथा फलम्।यथा कृषका:क्षेत्रे यानि बिजानि वपन्ति तानि एव सस्यानि विन्दन्ति तथैव मानवा: यानि यानि कर्म रुप बिजानि वपन्ति तानि एव फलानि विन्दन्ति।

एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन्।
ऋषयश्च महाभागा ब्रह्मलोकं मनीषिण: ॥उद्योगपर्व.44।14

अत्र तु ब्रह्मचर्य माहात्म्यं वर्णितम्। किशोरावस्थासु ब्रह्मचर्यं कति महत्वपूर्णं वर्तते।देवै: ब्रह्मचर्येणैव देवत्वं प्राप्तं तथा ऋषिभि: मनीषिभि:ब्रह्मचर्यस्यावलम्बनं अभवत् अतएव ते ब्रह्मलोकं प्राप्तवन्त:।

यमस्य वशमायान्ति काममूढा: पुन: पुन:।
अन्धनेत्रा यथैवान्धा नीयमाना: स्वकर्मभि:
॥उद्योगपर्व.68।14

ये मानवा: काममूढा: वा कामादिविषयेषु आसक्ता: ते सत्वरं मुत्युं अनुगच्छन्ति। अत: मानवै: काम- क्रोध - मद् -मत्सर -दम्भ -आलस्य एतेषु निरासक्ता: एव भूया:। एतान्श्लोकानभ्यस्य अस्मभ्यं महाभारतस्य महती कियती अस्ति इति अवगम्यते। व्यक्तित्व विकासाय न, तु मानवस्य सर्वासु अवस्थासु श्रेष्ठतर: एव। केचन कवय:, विद्वांस: स्वग्रन्थनिर्माणार्थं महाभारतमेव आश्रितवन्त:। भगवता श्रीव्यासेन एतद् ग्रन्थस्य तथा अष्टादशपुराणानाम् रचना कृता, वेदानां विभागा: कृता: अत: कश्चित् विद्वान् वदति-"व्यासोच्छिष्टं जगत्सर्वं" एततु सर्वथैव सत्यम्।

**समापनं**

यद् यद् सर्वावस्थासु सर्वेषांकृते आवश्यकं विद्यते तद् तद् सर्वम् संस्कृते निर्दिष्टं वर्तते। मानवविकास: अथवा मानव उध्दारमेव संस्कृतस्य लक्ष्यं अस्ति।बालावस्थासु वा किशोरावस्थासु उपर्युक्त संस्कृतग्रन्था: लाभप्रदा:। गृहस्थाश्रमे वेद-शास्त्राणि, धर्मशास्त्रम्, पुराणादि ग्रन्था: लाभप्रदा:। वृध्दावस्थासु उपनिषद् ग्रन्था:अतीव लाभप्रदा:।

एभि: मानवा: स्वजीवनं कृतार्थं कर्तुं शक्यन्ते। विश्वेस्मिन् आधुनिका: युवान: स्वजीवनं केवलं अन्तर्जाले एव यापयन्ति वा अन्येषां उपहासेनैव कालं यापयन्ति, तस्मात् जीवने कामक्रोधादि रिपूणां आगमनं भविष्यति तथा तेनैव बुध्दिनाश: भविष्यति। आधुनिकयुवान: स्वकार्ये यदि असफलीभूता: वा खण्डिताशंसा: जाता: तदा स्वात्महननं कर्तुं प्रभवन्ति।ये मानवा: परस्परेषु अकारणं वैरभावेन व्यवहरन्ति तेषांकृते अपि इमे संस्कृतग्रन्था: आवश्यका:। आधुनिकजना: परस्परवर्णानां अनादरं कुर्वन्ति, वैरभावं समाश्रयन्ति तेै:एते ग्रन्था: अनुसर्तव्या:। अस्माकं भारतवर्षे यदि शान्ति:, परस्परमित्रता राष्ट्रभाव: च प्रस्थापनं कर्तव्यमस्ति तर्हि संस्कृताध्ययनं महत्वपूर्णमेव। अस्माकं पूर्वजा: कालिदासादि महाकवय:, चाणक्यादि नीतिशास्त्रविद्वांस:, महान् तत्वज्ञ: पूज्यभगवत्पाद शंकराचार्य:, राजाविक्रमादत्य: च राजाभोजसदृशा: नैके महान्त: अनया गीर्वाण्या एव स्वयं कृतार्थजीवन कर्तुं चकार । अत: एव संस्कृताध्ययनं महत्वपूर्णं तस्मात् सद्ग्रन्थानां सङ्गति: भवेत् सद् ग्रन्थसङ्गत्या व्यक्तित्वविकास: तनैव मानवजीवनस्योध्दार: निश्चितं भविष्यति।

**सन्दर्भ ग्रन्था:।**


1. पंचतंत्रम् (अपरीक्षित कारकम्) टीकाकार-श्रीगुरुप्रसाद शास्त्री, प्रकाशक भार्गव पुस्तकालय, वाराणसी
2. नीतिशतकम् टीकाकार-रामजी शर्मा मधुवनी, प्रकाशक-महाशय श्यामलाल वर्मा।
3. ईशावास्योपनिषद् - टीका शांकरभाष्य-गीताप्रेस गोरखपुर
4. सुभाषिरत्नभाण्डागारम् संशोधितम् -नारायण राम आचार्य, प्रकाशक-चौखंबा प्रकाशन, वाराणसी
5. भगवद्गीता-सांख्ययोग, दैवासुरसंपद्विभागयोग गीताप्रे, गोरखपुर प्रकाशन
6. महाभारतम्- पर्व, शान्तिपर्व, अनुशासनपर्व, उद्योगपर्व। गीताप्रेस, गोरखपुर प्रकाशन
7. मनुस्मृती प्रस्तावना व्याख्याकार-स्वामी वरदानंद भारती, राधादामोदर प्रतिष्ठान,पुणे
8. रघुवंशम् व्याखाकार-श्रीकृष्णमणि त्रिपाठी, चौखंबा प्रकाशन, वाराणसी